स्व० पं० श्री वायुनन्दनमिश्रविरचितः

मूलशान्ति-पद्धतिः

भाषाटीकासहिता

टीकाकार :

स्व० पं० श्री अग्निनारायण मिश्रः

प्रकाशक :

मास्टर खेलाड़ीलाल एण्ड सन्स

कचौड़ीगली, वाराणसी-२२१००१

संवत् : २०४७] [मूल्यम् : ७-००

वायुनन्दन मिश्र

स्वर्गीयपण्डितश्रीवायुनन्दनमिश्रप्रणीता

मूलशान्तिपद्धतिः

[भाषाटीकासहिता]

श्रीगणेशाय नमः ॥ [अथ मयूखानुसारो गोमुखप्रसवकारिकाप्रारम्भः] ततो गर्गः ॥ पूषाश्विनौ गुरौ सार्प-मघा-चित्रेन्द्र-मूलभे ॥ एषु ऋक्षेषु जातस्य कुर्याद्गोजननं तथा ॥ १ ॥ जन्मर्क्षे वा त्रिजन्मर्क्षे शुभवारे शुभे दिने ॥ कृत्वाऽभ्यङ्गादिकं सर्वं गृहालङ्कारपूर्वकम् ॥ २ ॥ गोमयेनोपलिप्याथ गृहमीशानभागके ॥ पङ्कजं कर्णिकायुक्तं रजोभिः श्वेतवर्णकैः ॥ ३ ॥ व्रीहीं-स्तत्र विनिक्षिप्य यथावित्तानुसारतः ॥ नवशूर्पं तु तन्मध्ये रक्तवस्त्रं प्रसारयेत् ॥ ४ ॥ स्थापयित्वा शिशुं तत्र पुनः सूत्रेण वेष्टयेत् ॥ प्राङ्मुखं तमवाक्पादं

तिलगर्भं गतं शिशुम् ॥ ५ ॥ गोमुखं दर्शयित्वाऽथ पुनर्जातं तु गोमुखात् ॥ विष्णुर्योनीति मन्त्रेण गव्येन स्नापयेच्छिशुम् ॥ ६ ॥ गवामङ्गेति मन्त्रेण गवामङ्गेषु संस्पृशेत् ॥ विष्णोः श्रेष्ठेन मन्त्रेण गोऽसूतं तु बालकम् ॥ ७ ॥ आचार्यस्तु समादाय पश्चान्मात्रे ददेत्तथा ॥ माता जघन्यभागस्था शिशुमानीय तं मुखात् ॥ ८ ॥ ततः पित्रे तदा दद्यात्ततो मात्रे प्रदापयेत् ॥ वस्त्रे स्थाप्य पिताऽस्याथ पुत्रस्य मुखमीक्षयेत् ॥ ९ ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च संयुतम् । आपोहिष्ठादिभिर्मन्त्रैरभिषिञ्चेत्ततः शिशुम् ॥१०॥ मूर्ध्नि चाघ्राय तत्पुत्रं तन्मन्त्रेण तदा पिता ॥ अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे ॥ ११ ॥ आत्मा वै पुत्रनामासि सञ्जीव शरदः शतम् ॥ मूर्द्धनि त्रिरवघ्राय तं शिशुं स्थापयेत्ततः ॥ १२ ॥ पुण्याहं वाचयेत् पश्चाद्ब्राह्मणैर्वेदपारगैः ॥ दरिद्रायाऽथ विप्राय तां गामभ्यर्च्य दापयेत् ॥ १३ ॥ गो-वस्त्र-स्वर्ण-

धान्यानि दद्यादर्कादितः क्रमात् ॥ यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तदा पिता ॥ १४ ॥ ततो होमं प्रकुर्वीत स्व-स्वशाखोक्तमार्गतः ॥ उल्लेखनादिकं कृत्वा चाज्यभागान्तमाचरेत् ॥ १५ ॥ होमस्यैशानदिग्भागे धान्योपरि शुभं घटम् ॥ पञ्चगव्यं घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत् ॥ १६ ॥ क्षीरद्रुमकषायांश्च पञ्चरत्नानि निक्षिपेत् ॥ वस्त्रयुग्मेन संच्छाद्य गन्धादिभिरथार्चयेत् ॥ १७ ॥ विष्णुं वरुणमभ्यर्च्य प्रतिमां च विधानतः ॥ यत इन्द्रादिभिर्मन्त्रैः कुम्भं स्पृष्ट्वाऽभिमन्त्रयेत ॥ १८ ॥ दधि-मध्वाज्ययुक्तेन होमं कुर्याद्विधानतः ॥ आपो हिष्ठेति तिसृभिरप्सु मे सोम इत्यथ ॥ १९ ॥ तद्विष्णोः परमं पदमक्षीभ्यां तेऽथ सूक्त ॥ ऋग्भिराभिः प्रत्यृचं वाऽष्टाविंशतिसंख्यया ॥ २० ॥ अशक्तश्चाष्टसंख्यं वा दधि-मध्वाज्यसंयुतम् ॥ आदित्यादिग्रहाणां च कुर्यात् होमं समन्त्रकम् ॥ [इति गोमुखप्रसवकारिका समाप्ता]

श्रीगणेशाय नमः । [अथ गोमुखप्रसवशान्तिप्रयोगः] आचम्य प्राणानायम्य । अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च सम्प्रोक्ष्य ॥ हस्ते अक्षत-पुष्पाणि गृहीत्वा आनोभद्रादीन् सुमुखश्चैकदन्तश्चेत्यादि मङ्गलमन्त्रान् पठेत् ॥ सङ्कल्पः ॥ ॐ तत्सदद्य मासोत्तमे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रः अमुकशर्मा सपत्नीकोऽहं अस्य बालकस्य (मूलादि-) अमुकनक्षत्रोत्पत्ति-सूचितारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसवशान्तिं करिष्ये ॥ तदङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिवरणानि च करिष्ये ॥ तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनमहं करिष्ये ॥ [केषांचिन्मते

'केवलं गणेशपूजनमाचार्यवरणं कुर्यात्'] यथोपचारैः ग्रहशान्त्यनुसारेण पूजनं कुर्यात् ॥

गोमुखप्रसवशान्तिप्रयोग लिखते हैं। यजमान आचमन करे प्राणायाम करे। 'अपवित्रः पवित्रो वा०' इस मन्त्र से अपने ऊपर तथा पूजन सामग्री पर जल छिड़के। यजमान हाथ में लाल अक्षत तथा पुष्प लेकर 'आनोभद्रा०' इस मङ्गल मन्त्र का पाठ करे। इसके बाद यजमान अपने हाथ में द्रव्य, अक्षत, पूगीफल, जल, त्रिकुश लेकर सङ्कल्प करे। 'गोमुखप्रसवशान्ति करिष्ये' यजमान जल को छोड़ दे। पुनः जल अक्षत लेकर 'तदङ्गत्वेन०' से लेकर, 'आचार्यादि वरणानि च करिष्ये' तक पढ़कर जल छोड़े। (किसी आचार्य के मत से केवल, गणेशपूजन आचार्यवरण इतना ही है) मातृका आदि का, ग्रहशान्ति के अनुसार, आवाहन पूजन करे।

ततो वरणद्रव्यं गृहीत्वा अस्मिन् गोमुखप्रसवशान्तिकर्मणि एभिर्वरण-द्रव्यैः अमुकगोत्रममुकशर्माणं ब्राह्मणमाचार्यत्वेन त्वामहं वृणे ॥ वृतोऽस्मि ॥ प्रार्थना ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञे-

ऽस्मिन् आचार्यो भव सुव्रत ॥ एवं ब्रह्मवरणमपि कुर्यात् ॥

तब यजमान वरणसामग्री लेकर, सङ्कल्प करे। 'अस्मिन् गोमुखप्रसवशान्तिकर्मणि आचार्यत्वेन त्वामहं वृणे' ऐसा कहके आचार्य के हाथ में वरण दे। आचार्य कहे, 'वृतोऽस्मि' तब आचार्य की, 'आचार्यस्तु' से प्रार्थना करे। इसी प्रकार ब्रह्मा आदि ब्राह्मणों का वरण करना चाहिये।

ततः आचार्यः श्वेताष्टदलं विरच्य तस्योपरि द्रोणपरिमितं वा यथाशक्ति व्रीहीन्निक्षिप्य तस्योपरि वंशशूर्पं निधाय शूर्पे तिलान् दर्भांश्च विकीर्य तस्योपरि रक्तवस्त्रं प्रसार्य प्राङ्मुखं शिशुं निधाय माङ्गलिकसूत्रेण शूर्पं वेष्टयित्वा शिशुसमीपे गोमुखमानीय प्रसवं भावयित्वा मिलितेन पञ्चगव्येन विष्णुर्योनिमिति मन्त्रेण शिशुं स्नापयित्वा (तत्र मन्त्रः) ॐ विष्णुर्योनिं कल्पयतु त्वष्टारूपाणि पिंशन्तु ॥ आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ इति।

तब आचार्य श्वेत अष्टदल बनाकर उसके ऊपर द्रोण परिमित (याने १२८ मुट्ठी) अथवा

यथाशक्ति धान रखकर, उसके ऊपर बाँसका सूप रखे। सूप में तिल, कुश फैलाकर और लाल कपड़ा बिछा कर, पूर्व मुख बालक को सुला कर, माङ्गलिक सूत्र लपेटकर, उसके समीप गोमुख लगाकर, प्रसव भावना कर, मिले हुए पञ्चगव्य से 'विष्णुर्योनि' इस मन्त्र को पढ़ता हुआ, शिशु को स्नान करावे।

गवामङ्गेषु इति मन्त्रेण सर्वाङ्गेषु स्पृशेत् ॥ तत्र मन्त्रः ॥ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ इति गां स्पृशेत् ॥ ततो विष्णोः श्रेष्ठेनेति मन्त्रेण आचार्यः शिशुमादाय मात्रे दद्यात् ॥ तत्र मन्त्रः ॥ ॐ विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीयां पुमांसं पुत्रानाधेहि दशमे मासि सूतवे ॥ ततो माता पित्रे दद्यात् ॥ ॐ अङ्गादङ्गादिति-मन्त्रेण शिशुं मूर्ध्नि त्रिरवघ्राय मात्रे दद्यात् ॥ ॐ अङ्गादङ्गात्सम्भवसि हृदयादभिजायते ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ इति ॥ आचार्यः—आपो हिष्ठेति शिशुं पञ्चगव्येनाभिषिञ्चेत्। तत्र मन्त्रः ॥ ॐ आपो

हि ष्ठा मयोभुवस्ता नं ऽऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ ॐ तस्मा ऽअरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥

'गवामङ्गेषु' इस मन्त्र से गौ का स्पर्श करे। तब 'विष्णोः श्रेष्ठेन' इस मन्त्र से आचार्य शिशु को लेकर, माता की गोद में दे। तब माता पिता को दे। पिता 'अङ्गादङ्गात्' इस मन्त्र से बच्चे के शिर को तीन बार सूँघ कर माता को देदे। पुनः आचार्य 'आपो हिष्ठा' इस मन्त्र से बच्चे का पञ्चगव्य से सेचन करे।

ततः पिता गोमुखप्रसवकर्मणः पुण्याहं भवन्तो ब्रुवन्तु ॥ आचार्यः ॐ पुण्याहं पुण्याहं पुण्याहमिति ब्रूयात् ॥ तत आचार्याय सवत्सां गां दद्यात् ॥ तत्र सङ्कल्पः ॥ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रः अमुकशर्मा सपत्नीकोऽहं कृतैतद्गोमुखप्रसवशान्तिकर्मणः साङ्गतासिद्ध्यर्थं इमां गां सवत्सां सोपस्करसहितां रुद्रदैवत्याममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय-

ऽऽचार्याय तुभ्यमहं सम्प्रददे ॥ दक्षिणासङ्कल्पः ॥ कृतैतत्सवत्सगोदानकर्मणः साङ्गतासिद्ध्यर्थं दक्षिणाद्रव्यं आचार्याय तुभ्यमहं सम्प्रददे ॥ यथाशक्ति ग्रहप्रीत्यर्थं गोवस्त्र-स्वर्णधान्यादि दत्वा भूयसीं दक्षिणां दद्यात् ॥ देशकालौ सङ्कीर्त्य गोत्रः शर्मा सपत्नीकोऽहं कृतैतद्गोमुखप्रसवशान्तिकर्मणः साङ्गतासिद्ध्यर्थं तन्मध्ये न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे ॥

तब यजमान मूल में लिखे हुए पुण्याहवाचन वाक्य को पढ़े। आचार्य 'पुण्याहं' ऐसा ३ बार कहे। यजमान गोदान का सङ्कल्प करके आचार्य को सवत्सा गौ दे। दक्षिणा सङ्कल्प करे। 'कृतैतत्सवत्स० आचार्याय तुभ्यमहं सम्प्रददे' आचार्य को यथाशक्ति सुवर्णादि देकर भूयसीदक्षिणा का सङ्कल्प करे।

तत आचार्यः पञ्चभूसंस्कारपूर्वकमग्निं प्रतिष्ठाप्य ॥ समन्त्रकग्रहान् संस्थाप्य सम्पूज्य ॥ ततः कुशकण्डिकां विधाय आज्यभागान्तं कृत्वा आपो

हिष्ठेति तृचेन, अप्सु म इत्यृचा च, विष्णुं तद्विष्णोरित्यृचा, यक्ष्महणमक्षीभ्यामिति सूक्तेन ग्रहांश्च प्रत्येकमष्टादिसंख्यया दधि-मध्वाज्यैः शेषेण स्विष्टकृदन्तं च कुर्यात् ।

तब आचार्य पञ्चभू-संस्कार अग्निस्थापन करे। इसके बाद ग्रहों का स्थापन पूजन करे। तदनन्तर कुशकण्डिका कर 'आपो हिष्ठा' इस मन्त्र से जल वरुण 'तत्त्वायामि०' 'तद्विष्णो०' 'विष्णुयक्ष्महणं०' इनसे ग्रहों को, प्रत्येक को अट्ठाइस (या आठ) आहुति देकर बचे हुए दधि मधु घी से स्विष्टकृदाहुति करे।

ततोऽग्नेरीशान्यां कुम्भं संस्थाप्य तत्र पञ्चगव्य-तिल-व्रीहि-क्षीरद्रुमकषायान् क्षिप्त्वा वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रोपरि तद्विष्णोरिति मन्त्रेण विष्णुप्रतिमां तत्त्वायामि इति वरुणस्याक्षीभ्यामिति यक्ष्महणश्च प्रतिमामभ्यर्च्य य इन्द्रेति षड्वो जप्त्वाऽन्वाधानक्रमेण हुत्वा कर्मशेषं समापयेत् ॥ तत्र क्रमः ॥ कलशस्थापनविधिना कलशं प्रतिष्ठाप्य तस्योपरि ॐ तद्विष्णोः परमं पदꣳ सदा

पश्यन्ति सूरयः ॥ दिवीव चक्षुराततम् ॥ विष्णवे नमः ॥ विष्णुं० ॥ ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणे ह बोध्युरुशꣳस मा न ऽआयुः प्रमोषीः ॥ वरुणाय नमः । वरुणमा० ॥ ॐ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां चिबुकादधि ॥ यक्ष्मशीर्षण्यं मस्तिष्का जिह्वाया विवृहामि ते ॥ यक्ष्मणे नम ॥ यक्ष्माणमावा० ॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु ॥ विश्वेदेवास ऽइह मादयन्तामो३ ॥ प्रतिष्ठ ॥ विष्णवाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्त ॥ इति प्रतिष्ठाप्य ॥ विष्णवाद्यावाहितदेवताभ्यो नमः, इति सम्पूज्य ॥ ततः स्पृष्ट्वा वक्ष्यमाणमन्त्रान् जपेत् ॥ ॐ यत इन्द्र भयामहे ततो नो ऽअभयं कृधि ॥ मघवञ्छग्धि तव तन्न ऊतिभिर्विद्विषो विमृधो जहि ॥ १ ॥ त्वं हि राधसस्पते राधसोमहः क्षयस्यासि विधत्तः ॥ तं त्वा वयं मघवन्निन्द्रगिर्वणः ॥

सुतावन्तो हवामहे ॥ २ ॥ इन्द्रस्य कुत वृत्रहा परस्पानो वरेण्यः । स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥ ३ ॥ त्वन्नः पश्चादधरादुत्तरा पुर ऽइन्द्रं निपाहि विश्वतः ॥ आरे अस्मत्कृणुहि दैव्यं भयमारेहेतीरदेवीः ॥४॥ अद्याद्याश्वश्व इन्द्रत्राश्वपरे च नः ॥ विश्वा च नो जरितृन्त्सत्पते अह्ना दिवा नक्तं चरक्षिषः ॥ ५ ॥ प्रभंगी शूरो मघवा तुवी मघः संमिलो वीर्यायकम् ॥ उभा ते बाहू वृषणा शतक्रत नियां वज्रं मिमिक्षतु ॥ ६ ॥ इति जप्त्वा मिलितैर्दधिमध्वाज्यैर्होमं कुर्यात् ।

तब अग्नि के ईशान कोण में कलश स्थापन करे, कलश में पञ्चगव्य तिल धान्य दूध वाले वृक्ष की छाया (यथा बरगद इत्यादि) को छोड़ कर, दो वस्त्रों को लपेट कर, पूर्णपात्र पर 'तद्विष्णो०' इस मंत्र से विष्णु की, 'तत्त्वायामि०' इससे वरुण की, 'अक्षीभ्यां०' इससे यक्ष्मा की प्रतिमा की पूजा करे ॐ यत इन्द्रेति' छ ऋचाओं का जप करे, अन्वाधान क्रम से हवन करे, कर्म की समाप्ति करना ।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा। इदमिन्द्राय० ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये० ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय० ॥ ॐ इमानि हवनीयद्रव्याणि या या यक्ष्माणदेवतास्ताभ्यस्तेभ्यः ॥ मया परित्यक्तं न मम यथा दैवतमस्तु ॥ ॐ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्जे दधातन। महे रणाय चक्षसे स्वाहा ॥ इदमद्भ्यो० ॥१॥ ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः स्वाहा ॥ इदमद्भ्यो० ॥ २ ॥ ॐ तस्मा ऽअरं गमाम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च नः स्वाहा ॥ इदमद्भ्यो० ॥३॥ ॐ अप्सु मे सोमो ऽअब्रवीदन्तर्विश्वानि भेषजाः ॥ अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः स्वाहा ॥ इदमद्भ्यो० ॥ १ ॥ ॐ तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ॥ दिवीव चक्षुराततं स्वाहा ॥ इदं विष्णवे० ॥ २ ॥ ॐ अक्षीभ्यां नासिकाभ्यां कर्णाभ्यां चिबुकादधि। यक्ष्मं

सुतावन्तो हवामहे ॥ २ ॥ इन्द्रस्य कुत वृत्रहा परस्पानो वरेण्यः । स नो रक्षियच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥ ३ ॥ त्वन्नः पश्चादधरादुत्तरा पुर ऽइन्द्रं निपाहि विश्वतः ॥ आरे अस्मत्कृणुहि दैव्यं भयमारेहेतीरदेवीः ॥४॥ अद्याद्याश्वश्च इन्द्रत्राश्वपरे च नः ॥ विश्वा च नो जरितृन्त्सत्पते अह्ना दिवा नक्तं चरक्षिषः ॥ ५ ॥ प्रभंगी शूरो मघवा तुवी मद्यः संमिलो वीर्यायकम् ॥ उभा ते बाहू वृषणा शतक्रत नियां वज्रं मिमिक्षतु ॥ ६ ॥ इति जप्त्वा मिलितैर्दधिमध्वाज्यैर्होमं कुर्यात् ।

तब अग्नि के ईशान कोण में कलश स्थापन करे, कलश में पञ्चगव्य तिल धान्य दूध वाले वृक्ष की छाया (यथा बरगद इत्यादि) को छोड़ कर, दो वस्त्रों को लपेट कर, पूर्णपात्र पर 'तद्विष्णो०' इस मंत्र से विष्णु की, 'तत्त्वायामि०' इससे वरुण की, 'अक्षीभ्यां०' इससे यक्ष्मा की प्रतिमा की पूजा करे ॐ यत इन्द्रेति' छ ऋचाओं का जप करे, अन्वाधान क्रम से हवन करे, कर्म की समाप्ति करना ।

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा । इदमिन्द्राय० ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये० ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय० ॥ ॐ इमानि हवनीयद्रव्याणि या या यक्ष्माणदेवतास्ताभ्यस्तेभ्यः ॥ मया परित्यक्तं न मम यथा दैवतमस्तु ॥ ॐ आपो हि ष्ठा मयोभुवस्ता नं ऽऊर्जे दधातन । महे रणाय चक्षसे स्वाहा ॥ इदमद्भ्यो० ॥ १ ॥ ॐ यो वं शिवतमो रसस्तस्यं भाजयतेह नः ॥ उशतीरिव मातरः स्वाहा ॥ इदमद्भ्यो० ॥ २ ॥ ॐ तस्मा ऽअरं गमाम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च नः स्वाहा ॥ इदमद्भ्यो० ॥३॥ ॐ अप्सु मे सोमो ऽअब्रवीदन्तर्विश्वानि भेषजाः ॥ अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः स्वाहा ॥ इदमद्भ्यो० ॥ १ ॥ ॐ तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ॥ दिवीव चक्षुराततं स्वाहा ॥ इदं विष्णवे० ॥ २ ॥ ॐ अक्षीभ्यां नासिकाभ्यां कर्णाभ्यां चिबुकादधि । यक्ष्मं

शीर्षण्यं मस्तिष्काज्जिह्वया विवृहामि ते स्वाहा ॥ इदं यक्ष्मणे० ॥३॥ ॐ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ॥ यक्ष्मं दोषण्यं साभ्यां बाहुभ्यां विवृहामि ते स्वाहा ॥ इदं यक्ष्मणे० ॥४॥ ॐ आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि ॥ यक्ष्मं मतस्नाभ्या यक्नः प्लाक्षिभ्यो विवृहामि ते स्वाहा ॥ इदं यक्ष्मणे० ॥५॥ ॐ उरुभ्यां ते ऽष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां यक्ष्मं श्रोणीभ्यां मासदाद्भंसता विवृहामि ते स्वाहा ॥ इदं यक्ष्मणे० ॥ ६ ॥ ॐ मेहनाद्वनं करणाल्लोमभ्यस्ते नखेभ्यः ॥ यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते स्वाहा ॥ इदं यक्ष्मणे० ॥ ७ ॥ ॐ अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि ॥ यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते स्वाहा ॥ इदं यक्ष्मणे० ॥ ८ ॥ इति ॥

इसका क्रम १-८ तक ऊपर मूल में दिया है।

ततो ग्रहशान्त्यनुसारेण सूर्यादिग्रहाणां समन्त्रकं समित्तिल-चर्वाज्यद्रव्यैः

होमं कुर्यात् ॥ तत अग्निं सम्पूज्य स्वाहा-स्वधायुताग्नये वैश्वानराय नमः इति मन्त्रेण ॥ ततो हुतशेषं गृहीत्वा ब्रह्मणान्वारब्धः स्विष्टकृद्धोमं कुर्यात् ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते न मम ॥ तत आज्येन भूरादिनवाहुतिं कुर्यात् ॥

तदनन्तर ग्रहशान्ति के अनुसार सूर्यादि ग्रहों का समिधा तिल चरु घी से हवन करना। तब 'स्वाहा-स्वधा०' इससे अग्नि की पूजा करे, शेष हवन करने से जो द्रव्य बचा हो उसे अग्नि में छोड़े। 'अग्नये स्विष्टकृते०' इससे स्विष्टकृदाहुति करे, घी से भूरादि नवाहुति करे। इसका क्रम नीचे मूल में है।

तद्यथा ॐ भूः स्वाहा ॥ इदमग्नये० ॥ ॐ भुवः स्वाहा ॥ इदं वायवे० ॥ ॐ स्वः स्वाहा इदं सूर्याय० ॥ ॐ त्वन्नो अग्ने० स्वाहा। इदं वरुणाय० ॥ ॐ सत्वन्नो अग्ने० स्वाहा ॥ इदं वरुणाय० ॥ ॐ अयाश्चाग्ने० स्वाहा ॥ इदं अग्नये अयसे न मम ॥ ॐ ये ते शतं० स्वाहा ॥ इदं वरुणाय

सवित्रे विष्णवे० ॥ ॐ उदुत्तमं स्वाहा ॥ इदं वरुणायादित्याय० ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम ॥ संस्रवप्राशनम् । आचमनम् ॥ पवित्राभ्यां मार्जनम् ॥ ब्रह्मणे पूर्णपात्रदानम् ॥ कृतैतद्गोमुखप्रसवशान्तिकर्मणोऽङ्गतया विहितमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ अग्नेः पश्चादैशान्यां वा प्रणीताविमोकः । उपयमनकुशैः विमोकोदकेन मार्जयेत् ॥ तत्र मन्त्रः ॥ ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥

प्रोक्षणी में शेष घी हो उसमें से यजमान का प्राशन करा दे । आचमन कुश पवित्री से यजमान के ऊपर मार्जन करे । ब्रह्मा के पूर्णपात्र का सङ्कल्प करे । 'कृततत् गोमुख०' इससे सङ्कल्प करके 'तुभ्यमहं सम्प्रददे ।' ब्रह्मा को पूर्णपात्र दे । अग्नि के पश्चिम प्रणीता का जल गिरा कर उपयमन कुशा से यजमान के ऊपर 'ॐ आपः शिवा०' इस मन्त्र से मार्जन करे ।

ब्राह्मणभोजनसङ्कल्पः ॥ कृतैतद्गोमुखप्रसवशान्तिकर्मणः साङ्गता-

सिद्ध्यर्थं यथासंख्याकान् ब्राह्मणान् भोजयिष्ये ॥ भूयसीं दक्षिणां च दास्ये ॥ पूर्व-वत्सङ्कल्पं कृत्वा ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ॥ इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥ इति विसर्जनम् ॥

[इति गोमुखप्रसवशान्तिप्रयोगः] ॥

तब ब्राह्मणभोजन का सङ्कल्प यजमान करे, भूयसी दक्षिणा का सङ्कल्प करे, 'प्रमादात्' इसका पाठ करे। 'यान्तु देवगणा०' से विसर्जन करे।

श्रीगणेशाय नमः ॥ [अथ मूलशान्तिविधिः] शौनकः ॥ अथातः सम्प्रवक्ष्यामि मूलजातहिताय वै ॥ मातापित्रोर्धनस्यापि कुलज्ञातिहिताय च ॥ त्यागो वा मूलजातस्य ह्यष्टाब्दाद्वाऽप्रदर्शनम् ॥ अभुक्तमूलजातानां परित्यागो विधीयते ॥ अदर्शनाद्वापि पितुः स तु तिष्ठेत् समाष्टकम् ॥ लल्लः ॥ अभुक्त-

मूलसम्भवं परित्यजेत्तु बालकम् । समाष्टकं पिताऽथवा न तन्मुखं विलोकयेत् ॥ तदाऽऽद्यपादके पिता, जनन्यथ द्वितीयके, तृतीयके धनक्षयश्चतुर्थकेऽशुभावहम् ॥ प्रतीपमन्यपादतः फलं तदेव सार्पभे ॥ अभुक्तमूलं त्वाह बृहद्वशिष्ठः ॥ ज्येष्ठान्ते घटिका चैका मूलादौ घटिकाद्वयम् ॥ अभुक्तमूलमित्याहुर्जातं तत्र विवर्जयेत् ॥ केचिज्ज्येष्ठान्त्यं मूलाद्यं च पादं भुक्तमूलमित्याहुः ॥ कश्यपेन त्वन्यथोक्तम् ॥ मूलाद्यपादजो हन्ति पितरं तु द्वितीयजः ॥ मातरं स्त्वां तृतीयोऽर्थान् सुहृदं तु तुरीयजः ॥ फलं तदेव सार्पर्क्षे प्रतीपं त्वन्यपादजः ॥ एवं दुहितरि प्रोक्तं मूलजाया फलं बुधैः ॥ कन्यायां तु विशेषः ॥ न बाला हन्ति मूलर्क्षे पितरं मातरं तथा ॥ मूलजा श्वशुरं हन्ति व्यालजा[1] च तदङ्गनाम् ॥ माहेन्द्रं[2] चाग्रजं हन्ति देवरञ्च द्विदैवजा[3] ॥ अथातो मूलविधिं व्याख्यास्यामो

टि० १ आश्लेषाजाता । २ ज्येष्ठायामुत्पन्ना । ३ विशाखायामुत्पन्ना कन्या ।

मूलांशे प्रथमे पितुर्नेष्टो, द्वितीये मातुस्तृतीये धनधान्ययोश्चतुर्थे कुलशोकावहः, स्वयं पुण्यभागी स्यान्मूलनक्षत्रे मूलविधानं कुर्यात् ॥ शान्तिर्वा पुष्कला चेत् स्यात्तर्हि दोषो न कश्चन, इति ॥ मुख्यकालं प्रवक्ष्यामि शान्तिहोमं जपं ततः ॥ जातस्य द्वादशाहे च जन्मर्क्षे वा शुभे दिने ॥ समाष्टके द्वादशाब्दे कुर्याच्छान्तिकमादरात् ॥

[अथ मूलशान्तिप्रयोगः]

यथोक्तगोमुखप्रसवं कृत्वा ॥ ततो यजमानः स-पत्नीकः स-बालकः भद्रासनोपरि प्राङ्मुख उपविश्य दक्षिणतः पत्नीं चोपवेश्य ॥ ॐ माधवाय नमः । ॐ केशवाय नमः । ॐ नारायणाय नमः ॥ इति त्रिराचम्य ॥ ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥ इति पवित्रधारणं

कृत्वा ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च संप्रोक्ष्य प्राणायामं कुर्यात् ॥ हस्ते अक्षतपुष्पाणि गृहीत्वा आनोभद्रादीन् मङ्गलमन्त्रान् सुमुखश्चैकदन्तश्चेत्यादि मङ्गलश्लोकांश्च पठेत् ॥

प्रयोग लिखते हैं—बतलाये हुए समय में गोमुखप्रसवशान्ति करके, यजमान सपत्नीक बालक लेकर, सुन्दर पीढ़े पर पूर्वमुख बैठकर, आचमन, प्राणायाम, कुश पवित्री धारणकर, हाथ में अक्षत पुष्प लेकर, 'आनोभद्रा०' 'सुमुखश्चैकदन्तः०' इत्यादि मङ्गल मन्त्रों का पाठ करे।

सङ्कल्पः ॥ देशकालौ सङ्कीर्त्य गोत्रः शर्मा सपत्नीकोऽहं अस्य बालकस्य मूलनक्षत्रजननपित्राद्यरिष्टशान्त्यर्थं पञ्चाभिमन्त्रितकलशैः स्नानमहं करिष्ये ॥

तदनन्तर त्रिकुश पुष्प-अक्षत-पूगीफल-जल-द्रव्य हाथ में लेकर, 'देशकालौ' के लेकर 'स्नानमहं करिष्ये' तक पढ़कर सङ्कल्प जल छोड़े।

तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनमहं करिष्ये ॥ यथो-

पचारैः गणेशं सम्पूज्य ॥ स्वपुरतः श्वेतपङ्कजं विरच्य तस्योपरि सप्तधान्यराशिं कृत्वा ॥ तत्र मध्ये शतछिद्रं कलशं निधाय ॥ तच्चतुर्दिक्षु पूर्वादिक्रमेण (वा ईशानादिक्रमेण) चतुः--कुम्भान् स्थापनविधिना स्थापयेत् ॥

पुनः जल लेकर गणेश पूजन का सङ्कल्प करे। तब गणेश पूजन कर, यजमान अपने सामने चावल से श्वेत कमलाकार बनाकर, उसपर सप्तधान्य रखकर, सौ छिद्र वाले कलश को रख, उसके चारो तरफ पूर्वादि क्रम से या ईशानादि क्रम से प्रारम्भ कर चार कलश, स्थापनविधि से, स्थापन करे।

(अत्र स्थले पञ्चभिः कलशैः स्नानमित्याचारः। स्नानं तु मयूखाद्यनुसारात् कर्मान्ते अभिषेकसमये कुर्यात् इति क्रमः) तत्राचारक्रमः ॥ तत्प्राक् कुम्भे देवदारु-रक्तचन्दन-कमल-कुष्ठ-प्रियङ्गु-शुण्ठी-मुस्ता-आमलक-वच-सर्षप-अगर-मुरा-मांसी-ऋद्धि-वृद्धि-उशीर-इत्यादीनि क्षिपेत् ॥ रुद्राध्यायं जपेत् ॥ ॐ नमस्ते ६६ मन्त्रान् ॥

उसी स्थापित कलश के पूर्व वाले में देवदारु, रक्तचन्दनादि सोलह औषधियों को छोड़े और रुद्राध्याय का पाठ करे।

दक्षिणकुम्भे पञ्चामृतं गजमद-तीर्थोदक-सप्तधान्य-सुवर्णानि क्षिपेत् ॥ ॐ आशुः शिशान द्वादश मन्त्रान् जपेत् ॥

दक्षिण कलश में पञ्चामृत, गजमद नाम की औषधि, तीर्थ जल, सप्तधान्य, सुवर्ण छोड़े। 'आशुः शिशान०' यहाँ से १२ मन्त्रों का पाठ करना।

पश्चिमकुम्भे सप्त मृत्तिकाः क्षिपेत् ॥ ॐ कृणुष्वपाजः पञ्च मन्त्रान् जपेत् ॥

पश्चिम कलश में सप्तमृत्तिका छोड़ें 'कृणुष्वपाजः' पाँच मन्त्रों का पाठ करे।

उत्तरकुम्भे पञ्चरत्न-वट-अश्वत्थ-पलाश-प्लक्ष-उदुम्बराणां पल्लवान् क्षिपेत् ॥ जम्बू-निम्ब-कदम्ब-चिंचिडीक-वट-उदुम्बर-प्लक्ष-आम्राणां मूलत्वचः (छालः) सप्तविंशतिकूपजलानि च क्षिपेत् ॥ ॐ रक्षोहणमिति चतुर्मन्त्रान् जपेत् ॥

उत्तर तरफ स्थापित कलश में पञ्चरत्न, वड़, पीपल, पलाश, पकड़ी, गूलर—इनके पल्लवों को, आम्रुन आदि आठ वृक्षों के छाल, २७ कुआँ का जल छोड़े। 'रक्षोहणं०' इत्यादि चारों मन्त्रों का पाठ करे।

मध्यगते शतच्छिद्रकुम्भे शतौषधयः॥ तदभावे यथालाभं सद्वृक्षाणां पल्लवान्। विष्णुक्रान्ता-सहदेवी-तुलसी-शतावरी-कुश-कुंकुमानि च क्षिपेत्॥ त्र्यम्बकमिति १०८ जपेत्॥

मध्य में स्थापित सौ छिद्र वाले कलश में शतौषधि, उसके अभाव में अच्छे वृक्षों का पल्लव, विष्णुक्रान्ता आदि छोड़ना। 'त्र्यम्बकं०' इस मन्त्र का अष्टोत्तर-शत जप करे।

तत्र सर्वान् कुम्भान् स्थापनविधिना संस्थाप्य॥ सर्वेषु कुम्भेषु पूर्णपात्रोपरि वरुणमावाह्य सम्पूज्य॥ सर्वान् सूक्तान् तत्तत्कलशेषु जपित्वा॥ जपान्ते वंशपात्रे कमलखण्डं प्रसार्य तस्योपरि शतच्छिद्रं कलशं निधाय तन्मध्ये चतुःकुम्भस्थजलं प्रक्षिप्य॥ ततो यजमानः सपत्नीको बालकस्योपरि

जलधारां कुर्यात् ॥

कलशों को स्थापनविधि से स्थापन कर, पूर्णपात्र पर वरुण का आवाहनादि पूजन कर, बाँस के सूप, या डलिया में कम्बल के टुकड़े को बिछाकर, उसके ऊपर शतछिद्र कलश को रखकर, चारो कलश के जल से सपत्नीक यजमान बालक का अभिषेक करे।

तत्र मन्त्राः ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥ १ ॥ ॐ देवस्य त्वा० ॥ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥ २ ॥ ॐ देवस्य त्वा० ॥ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥ ३ ॥ ॐ विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥ ४ ॥ धामच्छदग्निरिन्द्रो ब्रह्मा

देवो बृहस्पतिः ॥ सचेतसो विश्वेदेवा यज्ञं प्रावन्तु नः शुभे ॥ ५ ॥ त्वं यविष्ठ दाशुषो नॄँ पाहि शृणुधी गिरः ॥ रक्षा तोकमुत त्मना ॥ ६ ॥ ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ॥ प्रप्र दातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ ७ ॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ यतो यतः समीहसे ततो नो ऽअभयं कुरु ॥ शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ इत्यभिषेकः ॥

'देवस्य त्वा०' से, 'द्यौः शांति०' तक ब्राह्मण पाठ करे ।

ततो यजमानः सपत्नीकः क्षौरनखनिकृन्तनं विधाय कृताभ्यङ्गो स्नानं कुर्यात् ॥ धौते वाससी परिधाय ॥ शुभासने प्राङ्मुख उपविश्य स्वदक्षिणतः

पत्नीं चोपवेश्य ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च सम्प्रोक्ष्य ॥ ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥ इति पवित्रधारणं कृत्वा ॥ ॐ माधवाय नमः । ॐ केशवाय नमः । ॐ नारायणाय नमः ॥ इति त्रिराचम्य ॥ प्राणायामत्रयं कृत्वा ॥

इसके बाद यजमान अपनी पत्नी के साथ बाल तथा नाखून कटवाकर, सुगन्धित तेल लगाकर स्नान करे। पत्नी अपने पैर में महावर आदि लगाकर शुद्ध रेशमी वस्त्र या सूती वस्त्र पहने। यजमान शुभासन पर पूर्वमुख बैठकर, अपने दक्षिण तरफ पत्नी को बैठाकर आचमन करे। ॐ केशवाय नमः ॥ ॐ नारायणाय नमः। ॐ माधवाय नमः॥ इससे ३ आचमन कर, 'पवित्रेस्थो०' इस मन्त्र से कुशा की पवित्री धारण कर, प्राणायाम करे। 'अपवित्रः०' इससे अपने ऊपर तथा पूजासामग्री पर जल त्रिकुश से छिड़के।

हस्ते अक्षतपुष्पाणि गृहीत्वा आनो भद्रादीन् सुमुखश्चैकदन्तश्चेत्यादि-मङ्गलमन्त्रान् पठेत् ॥ कुश-पुष्प-फलाऽक्षत-जल-द्रव्याणि चादाय सङ्कल्पं कुर्यात् ॥ ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीये प्रहरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे युगे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे (काश्यां तु आर्यावर्तैकदेशान्तर्गत—अविमुक्तवाराणसीक्षेत्रे आनन्दवने महाश्मशाने गौरीमुखे त्रिकण्टकविराजिते भागीरथ्याः पश्चिमे भागे) अन्यत्र ॥ प्रजापतिक्षेत्रे भागीरथ्यादि अमुक-दिग्भागे विक्रमशके बौद्धावतारे अमुकनामसंवत्सरे श्रीअमुकायने सूर्ये अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते

देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषण-विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकशर्मा सपत्नीकोऽहं ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अस्य बालकस्य मूलनक्षत्रजननसूचितपित्रादिसर्वारिष्टपरिहारार्थं मूलशान्तिं करिष्ये ॥

पुनः अक्षत पुष्प लेकर, 'आनोभद्रा०' आदि का पाठ कर, हाथ में कुश-पुष्प-पत्राक्षत-जल-पूगीफल द्रव्य लेकर, 'विष्णुः ३' इत्यादि पढ़कर प्रतिज्ञा सङ्कल्प करे। सङ्कल्प में काशी क्षेत्र के लिए विशेष वाक्य है। 'महाश्मशाने' से लेकर 'त्रिकण्टकविराजिते' तक योजना करना। अमुकतिथौ के स्थान पर वर्त्तमान तिथि वारादिक की योजना करना।

तदङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमन्त्र-जपं नान्दीश्राद्धमाचार्यादिवरणानि च करिष्ये ॥ तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये। ततो गणेशपूजनादारभ्य दिग्रक्षणप्रोक्षणान्तं ग्रहशान्त्यनुसारेण सर्वं कुर्यात् ॥

प्रधान सङ्कल्प के बाद यजमान हाथ में जल अक्षत लेकर, 'तदङ्गत्वेन' से लेकर 'आचार्यादि वरणानि च करिष्ये' तक पढ़कर जल छोड़े। जल अक्षत लेकर 'तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं करिष्ये' इसको पढ़कर जल छोड़े। गणेश पूजन से लेकर दिग्रक्षण तक ग्रहशान्ति के अनुसार करना चाहिये।

ततः हवनवेद्याः प्राग्भद्रपीठोपरि श्वेतवस्त्रं प्रसार्य चतुर्विंशतिदलं पद्मं कृत्वा तस्योपरि कलशं प्रतिष्ठाप्य पूर्णपात्रोपरि स्वर्णमयीं निर्ऋतिप्रतिमामधिदेवतासहितामग्न्युत्तारणपूर्वकं स्थापयेत् (तत्राग्न्युत्तारणं ग्रहशान्त्यनुसारेण कुर्यात्) अथ मूलनक्षत्रस्य निर्ऋतिः प्रधानदेवता ॥ तत्र मन्त्रः ॥ ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ॥ अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ॐ भू० निर्ऋतये नमः निर्ऋतिं० ॥ १ ॥ ततो ज्येष्ठाया अधिदेवता इन्द्रः ॥ तत्र मन्त्रः ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ

स्व॒स्ति नो॑ म॒घवा॑ धा॒त्विन्द्रः ॥ ॐ भू० इन्द्राय० इन्द्रमा० ॥ २ ॥ तस्याः प्रत्यधिदेवता आपः ॥ तत्र मंत्रः ॥ ॐ आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ ऽऊ॒र्जे द॑धातन ॥ म॒हे रणा॑य॒ चक्ष॑से॥ ॐ भू० अद्भ्यो नमः अप आवाहयामि ॥३॥

तब पूर्व में भद्रपीठ पर श्वेत कपड़ा बिछाकर, उसपर २४ दल का कमल बनाकर, उसके ऊपर कलश स्थापन कर, सुवर्ण की निर्ऋति की प्रतिमा अधिदेवता प्रत्यधिदेवता सहित अग्न्युत्तारण करे, स्थापन करे। 'असुन्वन्तम०' यह निर्ऋति का मन्त्र है। 'त्रातारमिन्द्र०' यह अधिदेव का मन्त्र है। 'आपो हिष्ठा०' यह प्रत्यधिदेव अप का मन्त्र है। उसी प्रकार श्लेषा का अधिदेव सर्प है; मघा का पितृ, जेष्ठा का इन्द्र, रेवती का पूषा, अश्विनी, का अश्विनौ तत्तन्मन्त्रों से अधिदेव प्रत्यधिदेव की प्रतिमा का स्थापन करे। अग्न्युत्तारण प्राणप्रतिष्ठा ग्रहशान्ति के अनुसार करना।

ततश्चतुर्विंशतिदलेषु चतुर्विंशद्देवानामावाहनम् ॥ ॐ भू० विश्वेभ्यो० विश्वान् देवानावाहयामि ॥ १ ॥ ॐ भू० विष्णवे० विष्णुमावाहयामि ॥२॥

ॐ भू० अष्टवसुभ्यो० अष्टवसूना० ॥ ३ ॥ ॐ भू० वरुणाय० वरुणं० ॥४॥
ॐ भू० अजैकपादे० अजैकपादं० ॥५॥ ॐ भू० अहिर्बुध्न्याय० अहिर्बुध्न्यं०
॥ ६ ॥ ॐ भू० पूष्णे० पूषाणं ॥७॥ ॐ भू० अश्विभ्यां० अश्विनौ० ॥८॥
ॐ भू० यमाय० यमं० ॥ ९ ॥ ॐ भू० अग्नये० अग्निमा० ॥ १० ॥
ॐ भू० प्रजापतये० प्रजापतिमा० ॥११॥ ॐ भू० सोमाय० सोमं० ॥१२॥
ॐ भू० रुद्राय० रुद्रं० ॥ १३ ॥ ॐ भू० अदितये० अदितिमा० ॥ १४ ॥
ॐ भू० बृहस्पतये० बृहस्पतिं० ॥१५॥ ॐ भू० सर्पेभ्यो० सर्पाना० ॥१६॥
ॐ भू० पितृभ्यो पितृना० ॥ १७ ॥ ॐ भू० भगाय० भगमा० ॥ १८ ॥
ॐ भू० अर्यमणे० अर्यमाणं ॥ १९ ॥ ॐ भू० सवित्रे० सवितारं० ॥२०॥
ॐ भू० विश्वकर्मणे० विश्वकर्माणं० ॥ २१ ॥ ॐ भू० वायवे० वायुं०
॥ २२ ॥ ॐ भू० इन्द्राग्नीभ्यां० इन्द्राग्न्योरा० ॥ २३ ॥ ॐ भू० मित्राय०

मित्रं० ॥ २४ ॥

तदनन्तर पूर्वदल से प्रारम्भ कर चौबीसों दल में क्रम से २४ नक्षत्र देवों का आवाहन करे। अक्षतपुञ्ज पर सोपाड़ी रखकर, उसीपर आवाहन करे। पूर्व में विश्वेभ्यो देवेभ्यो नमः॥ विश्वान् देवाना०' ॥ इसी प्रकार अष्टवसु का आवाहन करे, वरुण का आवा०। अजैकपद का आवा०। अहिर्बुध्न्य का आवा०। पूषा का आवा०। अश्विनो का आवा०। यम का आवा०। अग्नि का आवा०। प्रजापति का आवा०। सोम का आवा०। रुद्र का आवा०। अदिति का आवा०। बृहस्पति का आवा०। सर्प का आवा०। पितृ का आवा०। भग का आवा०। अर्यमा का आवा०। सविता का आवा०। विश्वकर्मा का आवा०। वायु का आवा०। इन्द्र-अग्नि का आवा०। मित्र का आवाहन करे।

ततो मण्डलाद्बाह्ये दशदिक्पालानावाहयेत् ॥ ॐ भू० इन्द्राय० इन्द्रं० ॥ १ ॥ ॐ भू० अग्नये० अग्निं० ॥ २ ॥ ॐ भू० यमाय० यमं० ॥ ३ ॥ ॐ भू० निर्ऋतये० निर्ऋतिं० ॥ ४ ॥ ॐ भू० वरुणाय० वरुणं० ॥ ५ ॥ ॐ

भू० वायवे० वायुं० ॥६॥ ॐ भू० सोमाय० सोमं० ॥७॥ ॐ भू० ईशानाय० ईशानं० ॥८॥ ॐ भू० ब्रह्मणे० ब्रह्माणं० ॥९॥ ॐ भू० अनन्ताय० अनन्तं० ॥ १० ॥ अक्षतान् गृहीत्वा ॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु ॥ विश्वेदेवास ऽइह मादयन्तामों३प्रतिष्ठ ॥ नैर्ऋत्यादिदेवताः सुप्रतिष्ठिता वरदा भवन्तु ॥ नैर्ऋत्याद्यावाहितदेवताभ्यो नमः इति पाद्यादिभिर्यथोपचारैः सम्पूजयेत् । ततः अग्निस्थापनम् ॥

पुनः पूर्वादि क्रम से दशदिक्पालों का आवाहन करे। पूर्व में इन्द्र का आवा०। आग्नेय में अग्नि का आवा०। दक्षिण में यम का आवा०। नैर्ऋत्य में निर्ऋति का आवा०। पश्चिम में वरुण का आवा०। वायव्य में वायु का आवा०। उत्तर में सोम का आवा०। ईशान में ईशान का आवाहन करके 'अस्यै प्राणा०' 'मनोजूति०' मन्त्र से 'नैर्ऋत्यादि देवताः सुप्रतिष्ठिताः वरदा भवन्तु' इससे प्रतिष्ठा करके लब्धोपचार से पूजन करे।

सङ्कल्पः ॥ देशकालौ सङ्कीर्त्य गोत्रः शर्माऽहं अस्मिन् मूलशान्तिकर्मणि

पञ्चभूसंस्कारपूर्वकं अग्निस्थापनं करिष्ये । तत्र क्रमः ॥ कुशैः परिसमूह्य तान् कुशानैशान्यां परित्यज्य ॥१॥ गोमयोदकाभ्यामुपलिप्य ॥२॥ स्फयेन स्रुवमूलेन वा उत्तरोत्तरक्रमेण त्रिरुल्लिख्य ॥३॥ उल्लेखनक्रमेण अनामिकाङ्गुष्ठेनोद्धृत्य ॥४॥ उदकेनाभ्युक्ष्य ॥ ५ ॥ इति पञ्चभूसंस्कारः ॥ ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे ॥ देवाँ२॥ऽआसादयादिह इति स्वाभिमुखं निदध्यात् ॥ अग्निपात्रे गन्धाक्षतादि दत्वा ॥ ततोऽग्नेरीशान्यां भद्रपीठोपरि नवग्रहान् संस्थाप्य तत्तन्मन्त्रैः सम्पूज्य ।

हाथ में जल लेकर सङ्कल्प करे, 'अस्मिन् मूलशान्ति-कर्मणि पञ्चभूसंस्कारपूर्वकं अग्नि-स्थापनं करिष्ये' जल छोड़ कर, पंचभूसंस्कार करे। इसका क्रम यह है। कुश से वेदी झाड़ना, उस कुश को ईशान कोण में फेंक देना। गोबर से वेदी लीपना। स्रुव से या स्फयः से दक्षिण से उत्तर तक प्रादेश मात्र तीन रेखा करना। उल्लेखन क्रम से दहिने हाथ की अनामिका अंगुष्ठ से रेखा की मिट्टी को लेकर बाँये हाथ में रख कर कोण में छोड़ देना। तदनन्तर

दक्षिण हस्त से वेदी पर जल छिड़के। काँसे की थाली में अग्नि रखकर, 'अग्निदूतं०' इस मन्त्र से अपने मुख की तरफ अग्नि छोड़ना। उस पीढ़े पर नवग्रहों का स्थापन करे। यथा—

तत्र क्रमः ॐ आ कृष्णेन रजसा० ॥ ॐ भू० सूर्याय० सूर्यं० ॥ १ ॥ ॐ इमं देवा० ॥ ॐ भू० सोमाय० सोमं० ॥ २ ॥ ॐ अग्निर्मूर्द्धा० ॥ ॐ भू० भौमाय० भौमं० ॥ ३ ॥ ॐ उद्बुध्यस्वाग्ने०। ॐ भू० बुधाय० बुधं० ॥४॥ ॐ बृहस्पते ऽअति० ॥ ॐ भू० बृहस्पतये० बृहस्पतिं० ॥५॥ ॐ अन्नात्परिस्रुतो० ॥ ॐ भू० शुक्राय० शुक्रं० ॥ ६ ॥ ॐ शं नो देवीर० ॥ शनैश्चराय० शनैश्चरं० ॥ ७ ॥ ॐ कया नश्चित्र० ॥ राहवे० राहुं० ॥ ८ ॥ ॐ केतुं कृण्वन्नं केतवे० ॥ केतवे० केतुं० ॥९॥

'आकृष्णेन०' इस मन्त्र से सूय का आवाहन करना। 'इमं देवा०' से सोम का आवा० ॥ २ ॥ 'अग्निर्मूर्धा' से भौम का आवा० ॥ ३ ॥ 'उद्बुध्य०' से बुध का आवा० ॥ ४ । 'बृहस्पते०' से बृहस्पति का आवा० ॥ ५ ॥ 'अन्नात्परिस्रुतो०' से शुक्र का आवा० ॥ ६ ॥

'शन्नो देवी०' से शनि का आवा० ॥ ७ ॥ 'कया नश्चित्र०' से राहु का आवा० ॥ ८ ॥ 'केतुं कृण्व०' से केतु का आवाहन० ॥ ९ ॥

(अधिदेवता दक्षिणे) ॐ त्र्यम्बकं० ॥ ईश्वराय० ईश्वरं० ॥ ॐ श्रीश्च ते० ॥ उमायै० उमां० ॥ ॐ यदक्रन्दः प्रथमं० स्कन्दाय० स्कन्दं० ॥ ॐ विष्णो रराटमसि० विष्णवे० विष्णुं० ॥ ॐ आ ब्रह्मन्० ब्रह्मणे० ब्रह्माणं० ॥ ॐ सजोषा इन्द्र० इन्द्राय० इन्द्रं० ॥ ॐ यमाय त्वा० यमाय० यमं० ॥ ॐ कार्षिरसि० कालाय० कालमा० ॥ ॐ चित्रावसो० चित्रगुप्ताय० चित्रगुप्तम्० ॥

'त्र्यम्बकं०' इस मन्त्र से सूर्य के दक्षिण भाग में ईश्वर का आवाहन करे ॥ १ ॥ इसी प्रकार प्रत्येक ग्रहों के अधिदेव का दक्षिण भाग में आवाहन करना। 'श्रीश्च ते०' से उमा का आवा० ॥ २ ॥ 'यदक्रन्द०' से स्कन्द का आवा० ॥ ३ ॥ 'विष्णो रराट०' से विष्णु का आवा० ॥ ४ ॥ 'आब्रह्मन्०' से ब्रह्मा का आवा० ॥ ५ ॥ 'स जोषा इन्द्र०' से इन्द्र का आवा० ॥ ६ ॥ 'यमाय त्वा०' से यम का आवा० ॥ ७ ॥ 'कार्षिरसि०' से काल का

आवा० ॥ ८ ॥ 'चित्रावसो०' से चित्रगुप्त का आवाहन करे ॥ ९ ॥

अथ प्रत्यधिदेवता वामे ॥ ॐ अग्निं दू तं० ॥ अग्नये० अग्निमा० ॥ ॐ आपो हि ष्ठा० अद्भ्यो नमः, अपः आ० ॥ ॐ स्योना पृथिवि० पृथिव्यै० पृथिवीं० ॥ ॐ इदं विष्णु० ॥ विष्णवे० विष्णुं० ॥ ॐ इन्द्र ऽआसां० इन्द्राय० इन्द्रं० ॥ ॐ अदित्यै रास्नासि० ॥ इन्द्राण्यै० इन्द्राणीं० ॥ ॐ प्रजापते न० ॥ ॐ प्रजापतये० प्रजापतिं ॥ ॐ नमोऽस्तु सर्पेभ्यो० ॥ सर्पेभ्यो० सर्पान्० ॥ ॐ ब्रह्म जज्ञानं० ॥ ब्रह्मणे० ब्रह्माणं० ॥

प्रत्यधि देवताओं का प्रत्येक ग्रहों के वामपार्श्व में आवाहन करे। 'अग्निन्दूतं०' से अग्नि का आवा० ॥ १ ॥ 'आपो हि ष्ठा०' से अप का आवा० ॥ २ ॥ 'स्योना पृथि०' से पृथिवी का आवा० ॥ ३ ॥ 'इदं विष्णु०' से विष्णु का आवा० ॥ ४ ॥ 'इन्द्र आ०' से इन्द्र का आवा० ॥ ५ ॥ 'अदित्यै रा०' से इन्द्राणी का आवा० ॥ ६ ॥ 'प्रजापते०' से प्रजापति का आवा० ॥ ७ ॥ 'नमोऽस्तु सर्पेभ्यो०' से सर्प का आवा० ॥ ८ ॥ 'ब्रह्म जज्ञानं०'

से भग्न का आवा० ॥ ९ ॥

ततः पञ्चलोकपालान् सूर्योत्तरे ॥ ॐ गणानान्त्वा० ॥ गणपतये० गणपतिं० ॥ ॐ अम्बेऽअम्बिके० ॥ दुर्गायै० दुर्गां० ॥ ॐ वायो ये तें० ॥ वायवे० वायुं० ॥ ॐ घृतं घृतं घृतपावानः० ॥ आकाशाय० आकाशं० ॥ ॐ या वां कशा० ॥ अश्विभ्यां अश्विनौ० ॥ ॐ वास्तोष्पते० ॥ वास्तोष्पतये० वास्तोष्पतिं० ॥ ॐ नहि स्पशमविदन्० ॥ क्षेत्रपालाय० क्षेत्रपालं० ॥

तब ग्रहों के उत्तर भाग में पञ्चलोकपालों का आवाहन करे। 'गणाना० त्वा०' से गणेश का आवा० ॥ १ ॥ 'अम्बे अम्बिके०' से दुर्गा का आवा० ॥ २ ॥ 'वायो ये तें० से वायु का आवा० ॥ ३ ॥ 'घृतं घृतपा०' से आकाश का आवा० ॥ ४ ॥ 'यावाङ्कशा०' से अश्विनी-कुमारों का आवा० ॥ ५ ॥ 'वास्तोष्पते०' से वास्तोष्पति का आवा० ॥ ६ ॥ 'न हि स्पश० से क्षेत्रपाल का आवाहन० ॥ ७ ॥

ततो मण्डलाद्बाह्ये दश दिक्पालानावाहयेत् ॥ ॐ त्रातारमिन्द्रं० इन्द्राय०

इन्द्रं० ॥ ॐ त्वन्नो ऽअग्ने तव० ॥ अग्नये० अग्निं० ॥ ॐ यमाय त्वा० यमाय० यमं० ॥ ॐ असुन्वन्तम० ॥ निर्ऋतये० निर्ऋतिं० ॥ ॐ तत्त्वा यामि० ॥ वरुणाय० वरुणं० ॥ ॐ आ नो नियुद्भिः० ॥ वायवे० वायुं० ॥ ॐ वयꣳ सोम० ॥ कुबेराय० कुबेरं० ॥ ॐ तमीशानं० ॥ ईशानाय० ईशानं० ॥ ॐ अस्मे रुद्रा० ॥ ब्रह्मणे० ब्रह्माणं० ॥ ॐ स्योना० अनन्ताय० अनन्तं० ॥ अस्यै प्राणाः प्रतिष्ठन्तु० ॥ ॐ मनो जूतिर्जुषता० ॥ ॐ सूर्यादि-अनन्तान्ता देवताः सुप्रतिष्ठिता वरदा भवन्तु ॥ सूर्यादि-अनन्तान्तदेवताभ्यो नमः इति षोडशोपचारैः पूजयेत् ॥ ॐ ग्रहा ऽऊर्ज्जाहुतयो व्यन्तो विप्राय मतिम् ॥ तेषां विशिप्रियाणां वोऽहमिषमूर्जꣳ समग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

तदनन्तर मण्डल के बाहर दशदिग्पालों का आवाहन करे। यथा 'त्रातारमिन्द्र०' से इन्द्र

का आवा० ॥ १ ॥ 'त्वन्नो ऽअग्ने तव०' से अग्नि का आवा० ॥ २ ॥ 'यमाय त्वा०' से यम का आवा० ॥ ३ ॥ 'असुन्वन्त०' से निर्ऋति का आवा० ॥ ४ ॥ 'तत्त्वायामि०' से वरुण का आवा० ॥ ५ । 'आ नो नियुद्भिः' से वायु का आवा० ॥ ६ ॥ 'वयꣳ सोम०' से कुबेर का आवा० ॥ ७ ॥ 'तमीशानं०' से ईशान का आवा० । ८ ॥ 'अस्मे रुद्रा०' से ब्रह्मा का आवा० ॥ ९ ॥ 'स्योना०' से अनन्त का आवाहन ॥ १० । 'सूर्यादि अनन्ता०' से प्रतिष्ठा करना । षोडशोपचार से पूजन करे । 'ग्रहा ऊर्जा०' इस मन्त्र से पुष्पाञ्जलि करे ।

ग्रहस्येशानदिग्भागे कलशस्थापनविधिना रुद्रकलशं संस्थाप्य कलशे वरुणं असंख्यातरुद्रांश्चाऽऽवाह्य पूजयेत् ॥ ॐ असंख्याता सहस्राणि ये रुद्रा ऽअधि भूम्याम् ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ असंख्यात-रुद्रेभ्यो० असंख्यातरुद्रान्० ॥

ग्रह के ईशान भाग में कलश स्थापन विधि से कलश स्थापन करे । वरुण का, असंख्यात रुद्र का आवाहन, पूजन करे । 'असंख्याता०' इस मन्त्र से असंख्यात रुद्र का पूजन करे ।

